12

12/2

127

ओ३म्.

कृष्णयजुर्वेदांतर्गता

कैवल्योपनिषद्.

सेयं हरिद्वारसमीपस्थनजीबाबादनिवासिपंडित
कुंदनलालांगजपंडितहरिशंकर-
शर्मणा संगृहीता ।

सैव

श्रीकृष्णदासात्मज--गङ्गाविष्णवध्यक्षक
"लक्ष्मीवेङ्कटेश्वर" मुद्रणालये
मैनेजर पं० शिवदुलारे वाजपेयीत्यनेन स्वाम्यर्थं
मुद्रयित्वा प्रकाशिता ।

शकाब्दाः १८३७, संवत् १९७२.

कल्याण-मुंबई.

All rights reserved by the publisher.

கைவல் யோபநிஷத்

॥ ॐ ॥

अथ

कृष्णयजुर्वेदीया
कैवल्योपनिषद् ।

ओ३म् अथाऽश्वलायनो भगवंतं परमेष्ठिनं समेत्योवाच ॥ अधीहि भगवन्ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम् ॥ यया चिरात्सर्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान् ॥ १ ॥ तस्मै सहोवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवैहि ॥ न कर्म्मणा न प्रजया धनेन न त्यागेनैकिनामृतत्वमानशुः ॥ २ ॥ परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥ वेदान्तविज्ञानस्वनिश्चितार्थः संन्यासयोगाद्यतयः शुद्धसत्वाः ॥३॥ ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥ विविक्तदेशे च सुखासनस्थाः शुचिः समग्रीवशिरः शरीराः ॥४॥ आत्माऽऽश्रमस्था सकलेंद्रियाणि निरुद्ध्य भक्त्या स्वगुरुं प्रणम्य ॥ हृत्पुंडरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशुद्धं विशोकम् ॥ ५ ॥ अचिन्त्यमव्यक्त-

मनन्तमाद्यं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥
तदादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूप-
मद्भुतम् ॥ ६ ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं
नीलकंठं प्रशान्तम् ॥ ध्यात्वा मुनेर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तात् ॥ ७ ॥ स ब्रह्मा स
शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ सैव विष्णुः
स प्राणाः स कालाग्निः स चंद्रमाः स आत्मा परमे-
श्वरः ॥ ८ ॥ स एव सर्वं यद्भूतं यश्च भाव्यं सनात-
नम् ॥ ज्ञात्वा तं मृत्युमत्येति नान्यः पंथा विमुक्तये
॥ ९ ॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥
संपश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥ १० ॥
मात्मानमरणीं कृत्वा प्रणवं चोत्तराणिकम् ॥ ज्ञान-
निर्मंथनाभ्यासात्पापं दहति पंडितः ॥ ११ ॥ स
एव मायापरिमोहितात्मा शरीरमास्थाय करोति
सर्वम् ॥ स्त्रयोत्रयानादिविचित्रभोगैः स एव जाग्र-
त्परितृप्तिमेति ॥ १२ ॥ स्वप्ने स जीवः सुखदुःख-
भोक्ता स्वमायया कल्पितविश्वलोके ॥ सुषुप्तिकाले
सकले विलीनो तमोऽभिभूत्वा स्वस्वरूपमेति॥१३॥

पुनश्च जन्मान्तरकर्म्मयोगात्स एव जीवः स्वपिति प्रबुद्धः ॥ पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम् ॥ १४ ॥ आधारमानंदमखंडबोधं यस्मिन् लयं याति पुरत्रयं च ॥ यत्रैव तेजांसि मनांसि विश्वमत्वार्तिभावविहरेण योगिनाम् ॥ १५ ॥ यतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ॥ खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ १६ ॥ यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ॥ सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्॥ १७॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत् प्रकाशते ॥ तद्ब्रह्माहमस्मि ज्ञात्वा सर्वबन्धैर्विमुच्यते ॥ १८ ॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यो भवेत् ॥ तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥ १९ ॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥ मयि सर्वं लयं यांति तदस्माद्द्वयमस्म्यहम् ॥ २० ॥

इति श्रीकृष्णयजुर्वेदान्तरगतायाः कैवल्योपनिषदः प्रथमखंडः समाप्तः ॥ १ ॥

ओ ३ म् अणोरणीयानहमेव तद्वन्महानहं विश्व-
मिदं विचित्रम् ॥ पुरातनोहं पुरुषोहमीशो हिरण्मयोहं
शिवरूपमास्मि ॥ १ ॥ नारायणोहं पुरुषः शिवोहं
ब्रह्माहमास्मि सकलोहमास्मि ॥ पूर्णोहमास्मि पुरुषो-
हमस्मि ज्ञानमहमस्मि सत्योहमास्मि ॥२॥ अपाणि-
पादोहमचिन्त्यशक्तिः पश्यामि चक्षुः स शृणोमि
कर्णः ॥ अहं विजानामि विविक्तरूपो न चास्ति वेत्ता
मम चित्स्वधाहम् ॥ ३ ॥ वेदैरनेकैरहमेव वेद्यो
वेदान्तकृत् वेदविदेव चाहम् ॥ न पुण्यपापे मम
नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति ॥ ४ ॥
न भूमिरापो न च वह्निरस्ति न चानिलो मेस्ति न
चांबरं च ॥ एवं विदित्वा परमात्मरूपं गुहाशयं
निष्फलमाद्वितीयम् ॥ ५ ॥ समस्तसाक्षिं सदसद्वि-
हानं प्रयाति शुद्धं परमात्मरूपम् ॥ ध्यायेज्जगद्बीजज-
गन्निवासं विश्वं जुहोति वसुधादि शिवावसानम् ॥ ६ ॥
यः शतसाद्रियमधीते ॥ स अग्निपूतो भवति ॥ स वायु-
पूतो भवति ॥ स आत्मपूतो भवति ॥ सुवर्णस्तेया-

त्पूतो भवति ॥ कृत्याकृत्यात्पूतो भवति ॥ तस्माद-विमुक्तम् ॥ आत्माश्नुते ॥ भवति आश्रमे ॥ सर्वदा सकृत् वा जपेदनेन ज्ञानमाप्नोति ॥ संसारार्णवनाशनम् ॥ तस्मादेवं विदित्वैनं कैवल्यफलमश्नुते ॥७॥

इति श्रीकृष्णयजुर्वेदान्तरगतायाः कैवल्यो-
पनिषदः द्वितीयखंडः समाप्तः ।

ओ ३ म् सह नाववतु सह नौ भुनक्तु सहवीर्य्यं करवावहै तेजस्विनावधीतमस्तु मा विद्विषावहै ओ ३ म् ॥ शांतिः १ शांतिः २ शांतिः ३ ॥

इयं कैवल्योपनिषद् नजीबाबादनिवासिपंडित-कुंदनलालांगजहरिद्वारस्थपंडितहरिशंकरशर्म्मसकाशात् लब्ध्वा श्रीकृष्णदासात्मज-गंगाविष्णोः अध्यक्ष लक्ष्मीवेंकटेश्वर " मुद्रणालये मैनेजर पं० शिवदुलारे वाजपेयीत्यनेन स्वाम्यर्थं मुद्रिता प्रकाशिता च । २०।११६

पुस्तक मिलनेका ठिकाना—गङ्गाविष्णु श्रीकृष्णदास, " लक्ष्मीवेंकटेश्वर " छापाखाना, कल्याण—मुंबई.

सनातनधर्मभजनमाला.

प्रथम भाग.

कलिमलग्रसित मनुष्योंका चपल चित्त भगवदाराधनमें नहीं लगता क्योंकि—इसका स्थिर और एकाग्र होना निपट असंभव है । भगवान् श्रीकृष्ण कहते हैं " तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं " अर्थात् पवन और मन दोनोंहीकी गतिका अवरोध करना बडा कठिन है । परन्तु गानविद्यामें कुछ ऐसा जादू है कि मनुष्यके चित्तपै ठगौरीसी पड जाती है । भगवान् श्रीमुखसे कहते हैं " मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद " अर्थात् गायनसमाजमें स्वयं श्रीभगवान् उपस्थित रहते हैं इसीसे हमने सनातनधर्मकी उत्कृष्ट शिक्षाद्वारा भगवद्भक्तिको उत्पन्न करनेवाले अनूठे रागरागिनी भजन गजल आदिका संग्रह कराके ये उत्तम ग्रन्थ छापा है । भजनमंडलियों और सनातनधर्मसभाओंमें इसकी हाथोंहाथ खूब विक्री होरही है । इसके सभी पद बडे मार्केके हुए हैं । मू० ६ आना.

पुस्तकें मिलनेका ठिकाना—गंगाविष्णु श्रीकृष्णदास,
' लक्ष्मीवेंकटेश्वर ' छापाखाना, कल्याण—मुंबई.